45

Roll No. ........................ Total No. of Pages : 4+2

ME 2014-15 Total No. of Questions : 16

# पूर्वमध्यमा द्वितीयखण्डः

## विषय कोड : 601

## संस्कृतकाव्यम्

### प्रथम प्रश्नपत्र

**समय : 3 घण्टे** **पूर्णांक : 100**

---

**निर्देश :— (*i*) सर्वे प्रश्नाः समाधेयाः।**

**(*ii*) प्रश्नाङ्काः सम्मुखे प्रदत्ताः।**

1. उचितं विकल्पं चित्वा लिखत : 5×1=5

(क) शिवराजविजयकाव्ये कति विरामाः सन्ति ?

(1) त्रयः (2) द्वादश

(3) चत्वारः (4) अष्ट

(ख) शिवराजविजयकाव्यं काव्यस्य कस्मिन् भेदे आयाति ?

(1) गद्यकाव्यभेदे (2) पद्यकाव्यभेदे

(3) चम्पूकाव्यभेदे (4) आख्यायिका भेदे।

(ग) 'जगत्' इत्यस्मिन् पदे का विभक्तिः ?

(1) प्रथमा (2) द्वितीया

(3) षष्ठी (4) प्रथमाद्वितीया च

(घ) 'वयसा' इत्यस्मिन् पदे का विभक्तिरस्ति ?

(1) प्रथमा (2) तृतीया

(3) पञ्चमी (4) षष्ठी

(ङ) 'संश्रुत्य' इत्यस्मिन् पदे क: प्रत्यय: ?

(1) ल्युट् (2) तव्यत्

(3) मतुप् (4) ल्यप्

2. प्रदत्तै: शब्दै: रिक्तस्थानं पूरयत् : 5×1=5

जानीते, साधयेयं, महान्, लक्षितो, देवशर्मा

(क) सत्यं न ...................... मया समयवेग:।

(ख) को न ...................... उदयपुरराज्यम्।

(ग) ...................... सौवर्ण्या: रक्षक: आसीत्।

(घ) कार्यं वा ...................... देहं वा पातयेयम्।

(ङ) तस्मिन् पर्वते आसीदेको ...................... कन्दर:।

3. यथोचितं युग्मं मेलयत् : 5×1=5

(क) मरीचिमालिन: (*i*) सहाध्यायी

(ख) गौरसिंह: (*ii*) शतावधानी

(ग) मिलिन्द: (*iii*) आदित्य:

(घ) अम्बिकादत्तव्यास: (*iv*) सौवर्णी

(ङ) सतीर्थ्य: (*v*) भ्रमर:

4. अधोलिखितेषु वाक्येषु सत्यं/असत्यं लिखत : 5×1=5

(i) मरीचिमालिनः अहोरात्रं न जनयति।

(ii) देवशर्मा गौरसिंहस्य कुलपुरोहितः अस्ति।

(iii) शिववीरः सिंहदुर्गे निवसति।

(iv) शिवराजविजयकाव्यं ऐतिहासिकं महाकाव्यमस्ति।

(v) वीररसः शिवराजविजयस्य मुख्यो रसः अस्ति।

5. अधोलिखितान् प्रश्नान् **एक**वाक्येन उत्तरत : 5×1=5

(i) 'गायत्री अमुमेव गायति' अत्र अव्ययपदं किम् ?

(ii) पर्णकुटीरस्य दक्षिणतः किम् आसीत् ?

(iii) योगिराजं प्रति भारतदशावर्णनं कः करोति ?

(iv) योगिराजः कस्याः रोदनमश्रृणोत् ?

(v) गौरसिंहस्य पिता कः आसीत् ?

6. अधोलिखितान् प्रश्नान् पूर्णवाक्येन उत्तरत (केचन **पञ्च**) : 5×2=10

(i) काव्यं कतिविधं नामानि च लिखत ?

(ii) 'सखि हे नन्दतनय आगच्छति' इदं गीतं कः गायति ?

(iii) शिवराजविजयकाव्यस्य रचनाकारः कः अस्ति ?

(iv) शिववीर: केनास्त्रेण अफजलखानस्य वधमकरोत् ?

(v) शिवराजविजये कति नि:श्वासा: सन्ति ?

(vi) ''विष्णोर्माया भगवती यया सम्मोहितं जगत्' इति वाक्यं कस्मिन् ग्रन्थेऽस्ति।

7. केचन् **पञ्च**प्रश्ना: समाधेया: – 5×2=10

(i) भीमानद्या: वर्णनं कस्मिन् नि:श्वासेऽस्ति ?

(ii) प्रतापदुर्गस्य समीपं क: ससेनास्तिष्ठति ?

(iii) प्रतापदुर्गे रात्रौ कीदृशजनानां प्रवेश: निषिद्ध: ?

(iv) 'मया बहुश: परीक्षितोऽसि' अत्र अव्ययपदं किम् ?

(v) 'महाराष्ट्रदेशरत्नं' इति विशेषणं कस्मै प्रयुक्तम् ?

(vi) सौवर्ण्या: अपरं नाम किम् आसीत् ?

8. केचन **पञ्च** प्रश्ना: समाधेया: – 5×2=10

(i) महाराजशिववीरस्य गुप्तचर: क: आसीत् ?

(ii) 'सञ्जात:' अस्मिन् पदे क: प्रत्यय: ?

(iii) 'पङ्कजश्री:' इत्यत्र का विभक्ति: ?

(iv) 'अभूत्' इत्यत्र क: लकार: ?

(v) 'तिरस्करोषि' इत्यस्य लकारं लिखत।

(vi) 'किमप्यस्तु, पन्थानं निर्दिश' अत्र अव्ययपदं किम् ?

9. प्रथमो विरामस्य कथासार: लेख्य:। 5

**अथवा**

शिवराजविजयकाव्यस्य काव्यसौन्दर्यं निरूपयत्।

10. चतुर्थनि:श्वासस्य कथासारं लिखत। 5

**अथवा**

शिववीरस्य चरित्र-चित्रणं लिखत।

11. 'विष्णोर्माया भगवती यथा सम्मोहितं जगत्' अस्या: कारिकाया: व्याख्यां कुरुत। 5

**अथवा**

'हिंस्र: स्वपापेन विहिंसित: खल: साधु: समत्वेन भयाद् विमुच्यते'—अस्या: कारिकाया: व्याख्यां कुरुत।

12. प्रथमनि:श्वासस्य कथासारं लिखत। 5

**अथवा**

शिवराजविजयकाव्यस्य भाषाशैलीं लिखत।

13. ब्रह्मचारिगुरोरनुसारेण कीदृशै: जनै: कालवेग: न ज्ञायते ? 5

**अथवा**

द्वितीयनि:श्वासस्य कथासारं लिखत।

14. ब्रह्मचारिगुरो: आत्मग्लानेर्वर्णनं कुरुत। 5

**अथवा**

भीमानद्या: वैशिष्ट्यं वर्णयत।

P.T.O.

5



P.T.O.

15. पञ्चदिवसानाम् अवकाशाय स्वप्राचार्यस्य कृते एकं पत्रं लिखत। 5

**अथवा**

धनार्थं स्वपितरं प्रति पत्रं लिखत।

16. अम्बिकादत्तव्यासस्य जीवनपरिचयं कवित्वशक्तिञ्च लिखत। 10

**अथवा**

अफजलखानेन सह योद्धुं शिववीरस्य सज्जतायाः वर्णनं कुरुत।